| अथ प्रकीर्णकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ सूर्णदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | अधोच्छिष्टस्य कामतः सुरेतरमद्यस्पर्शे अकामतः शूद्रोच्छिष्टस्य लशुनादीनाञ्च स्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | कामतः सुराया दर्शने स्नानं प्राणायामत्रयं घृतप्राशनञ्च। | | | |
| | अकामतः सुरायाः स्पर्शने घ्राणे चाप्येवम्। | | | |
| | कामतस्तस्याः स्पर्शे घ्राणे च जातिभ्रंशकरपापस्य प्रायश्चित्तं ज्ञेयम्। असोमपायिनां सुरापसम्बन्धिसुराघ्राणे उदकमज्जनं त्रिरघमर्षणं घृतप्राशनञ्च। | | | |
| अधोच्छिष्टस्य नरादिपुरीषस्पर्शः। आदिना श्वकाककङ्कगृध्रादिग्रहणम्। | अधोच्छिष्टस्य सचेलस्नानम्। | | | |
| | ऊर्द्ध्वोच्छिष्टस्योपवासः। पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| अथानुच्छिष्टस्य मलस्पर्शः। मला यथा।"वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः। श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः॥" | पूर्व्वेषां षण्णां नाभेरधः करद्वये च स्पर्शे मृज्जलाभ्यां क्षालनम्। उत्तरेषां षण्णां नाभेरधः करद्वये च स्पर्शे—केवलजलेन क्षालनम्। नाभेरूर्द्ध्वं विण्मूत्रप्रभृतिस्पर्शे स्नानम्। चक्षुषि ओष्ठे बाहुकरयोश्च स्पर्शे मृत्तोयगोमयैस्तदङ्गक्षालनं स्नानं उपवासः पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | भासवानरमार्जारखरोष्ट्रसूकराणाममेध्यस्पर्शे सचेलं स्नानम्। | | | |
| | एतदपि अनुच्छिष्टस्य नाभ्यूर्द्ध्वलेपोपहतविषयम्। अथ उच्छिष्टविषयश्च। | | | |
| | काकवलाहकाभ्यां विष्ठितस्य श्रोत्रमुखाप्रविष्टामेध्यलिप्तशरीरस्य च तदङ्गक्षालनं स्नानञ्च। अमेध्यानि यथा।"मानुषास्थि शवं विष्ठा रेतो मूत्रार्त्तवं वसा। स्वेदाश्रुदूषिका श्लेष्मा मद्यञ्चामेध्यमुच्यते॥" एषां देहात् प्रच्युतानामेवामेध्यत्वम्। मद्यविण्मूत्रविप्रुषां मुखमण्डलस्पर्शे मृत्तिकागोमयैर्लेपनं स्नानं उपवासः। तदन्ते पञ्चगव्यपानञ्च। अत्र विशेषो यथा। परस्य मानुषस्यास्थिवसाविष्ठार्त्तवमूत्ररेतोमज्जशोणितानां स्पर्शे लेपमार्जनं स्नानं आचमनञ्च। आत्मसम्बन्धिनामेतेषां स्पर्शे परिमार्ज्जनमाचमनञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| अथ मानुषास्थिस्पर्शः। | सस्नेहमानुषास्थिस्पर्शे स्नानम्। | | | |
| | कामतः स्पर्शे स्नानं गायत्र्यष्टशतजपः। घृतप्राशनं त्रिराचमनञ्च। | | | |
| | कामतोऽत्यन्ताभ्यासे त्रिरात्राशौचान्ते कृच्छ्रपादः। | ० | ॥।० पणाः। | यथाशक्ति। |
| | निःस्नेहस्य स्पर्शे आचमनं गोस्पर्शः अर्कदर्शनं वा। कामतोऽत्यन्ताभ्यासे अहोरात्राशौचान्ते एतानि कार्य्याणि। | | | |
| अथ रुद्रनिर्म्माल्यस्पर्शः। | सचेलस्नानम्। | ० | ० | ० |
| अथ रजस्वलायाः सवर्णासवर्णरजस्वलास्पर्शः। | रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः। पञ्चगव्यपानञ्च। एतत् कामतः। | ० | ॥० पणाः। | यथाशक्ति। |